न कस्यापि भवेच्छिष्यो यथाऽहं पुरुषोत्तम ॥ १४ ॥
अतिवर्णाश्रमी साक्षाद्गुरूणां गुरुरुच्यते ।
तत्समो नाधिकश्चास्मिँल्लोकेऽस्त्येव न संशयः ॥ १५ ॥
यः शरीरेन्द्रियादिभ्यो विभिन्नं सर्वसाक्षिणम् ।
पारमार्थिकविज्ञानसुखात्मानं स्वयंप्रभम् ॥ १६ ॥
परतत्त्वं विजानाति सोऽतिवर्णाश्रमी भवेत् ।
यो वेदान्तमहावाक्यश्रवणेनैव केशव ॥ १७ ॥
आत्मानमीश्वरं वेद सोऽतिवर्णाश्रमी भवेत् ।
योऽवस्थात्रयनिर्मुक्तमवस्थात्रयसाक्षिणं ॥ १८ ॥
महादेवं विजानाति सोऽतिवर्णाश्रमी भवेत् ।
वर्णाश्रमादयो देहे मायया परिकल्पिताः ॥ १९ ॥

---

ब्रह्मचर्यादीनामाश्रममात्ररूपत्वात्स्वोत्तमं प्रत्यपि विद्योत्कर्षसंभवे गुरुत्वमङ्गीकृतम् । वर्णाश्रमातिक्रमस्तु निरतिशयज्ञानोत्कर्ष एवेति तद्वन्तमपेक्ष्य कस्यापि विद्योत्कर्षाभावात्स गुरुरेव न शिष्य इत्याह—अतिवर्णाश्रमीति ॥ १४ ॥ १५ ॥ प्रतिज्ञातं तस्य सर्वोत्कर्षमुपपादयितुं तल्लक्षणमाह––यः शरीरेति ॥ १६ ॥ विजानाति विशेषेण जानाति साक्षात्करोतीत्यर्थः । इत्थंभूतो हि लोकसंग्रहाय वर्णाश्रमधर्मानाचरन्ननाचरन्वा सर्वोत्तमत्वेन गुरुरेवेत्यर्थः । तादृशस्यापि हि तदाचरणं भवति । 'सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्' इति ॥ यो वेदान्तेति । 'तं त्वौपनिषदम्' इति श्रुतेः ॥ १७ ॥ परतत्त्वसाक्षात्कारस्य मनननिदिध्यासनाङ्गनिबन्धनत्वाद्वेदानधिकृतानां भाषादिमुखेन ज्ञानमपि क्रमेण वेदाधिकारप्राप्तिद्वारेणैवोपकारकमिति हि प्रागुक्तम्—'अन्येषामपि सर्वेषां ज्ञानाभ्यासो विधीयते । भाषान्तरेण कालेन तेषां सोऽप्युपकारकः' इति । तमेवाऽऽत्मवेदनक्रममाह—योऽवस्थेति ॥ १८ ॥ देह इति । देहसंबन्धोपाधिनिबन्धना आत्मनि कल्पि-

नाऽऽत्मनो बोधरूपस्य मम ते सन्ति सर्वदा ।
इति यो वेद वेदान्तैः सोऽतिवर्णाश्रमी भवेत् ॥ २० ॥
आदित्यसन्निधौ लोकश्चेष्टते स्वयमेव तु ।
तथा मत्सन्निधावेव चेष्टते सकलं जगत् ॥ २१ ॥
इति यो वेद वेदान्तैः सोऽतिवर्णाश्रमी भवेत् ।
सुवर्णे हारकेयूरकटकस्वस्तिकादयः ॥ २२ ॥
कल्पिता मायया तद्वज्जगन्मय्येव सर्वदा ।
इति यो वेद वेदान्तैः सोऽतिवर्णाश्रमी भवेत् ॥२३॥
शुक्तिकायां यथा तारं कल्पितं मायया तथा ।
महदादि जगन्मायामयं मय्येव कल्पितम् ॥ २४ ॥
इति यो वेद वेदान्तैः सोऽतिवर्णाश्रमी भवेत् ।
चण्डालदेहे पश्वादिशरीरे ब्रह्मविग्रहे ॥ २५ ॥
अन्येषु तारतम्येन स्थितेषु पुरुषोत्तम ।

---

ताः ॥ १९ ॥ बोधात्प्राक्कल्पनया सन्तोऽपि वस्तुतो न सन्ति । बोधोत्तरकाले त्वनुभवतोऽपीति सर्वदेत्युक्तम् ॥ २० ॥ नन्ववस्थात्रयविरहे स्वस्याऽऽत्मनोऽकर्तृत्वादीश्वरस्य च जगत्कर्तृत्वात्कथमात्मानमीश्वरं वेदेति तत्राऽऽह—आदित्येति । य ईश्वरोऽपि वस्तुतो न कर्ता तस्मिन्नधिष्ठाने सव्यापारस्य जगतः कल्पितत्वादेव तस्य जगत्कर्तृत्वव्यवहारः । यथाऽऽदित्यस्य संनिधौ लोकस्य प्रवृत्तिदर्शनादप्रवर्तकेऽप्यादित्ये प्रवर्तकत्वव्यवहारस्तद्वत् ॥ २१ ॥ परस्परव्यावृत्तं चेत्यं सर्वमनुवृत्ते चिद्रूपे कल्पितमित्यत्र निदर्शनमाह—सुवर्ण इति श्रूयते हि—'चिद्धीदं सर्वं काशते काशते च' इति ॥ २२ ॥ २३ ॥ महदादीनामपि सति प्रमातर्यबाध्यत्वे सत्यत्वमिति मन्यमानं प्रति सत्येव प्रमातरि बाध्यमानं शुक्तिरूप्यमुदाहरति—शुक्तिकायामिति ॥ २४ ॥ एकस्मिन्नेव रूपे विचित्रं वस्तु यथा कल्पितं तथा तदुपाधिकं तारतम्यमपीत्यत्र निदर्शन-

व्योमवत्सर्वदा व्याप्तः सर्वसंबन्धवर्जितः ॥ २६ ॥
एकरूपो महादेवः स्थितः सोऽहं परामृतः ।
इति यो वेद वेदान्तैः सोऽतिवर्णाश्रमी भवेत् ॥ २७ ॥
विनष्टदिग्भ्रमस्यापि यथापूर्वं विभाति दिक् ।
तथा विज्ञानविध्वस्तं जगन्मे भाति तन्नहि ॥ २८ ॥
इति यो वेद वेदान्तैः सोऽतिवर्णाश्रमी भवेत् ।
यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः ॥ २९ ॥
तथा जाग्रत्प्रपञ्चोऽपि परमायाविजृम्भितः ।

---

माह—चण्डालदेह इति ॥ २५ ॥ सूचीपाशादिसंबन्धे तदुपाधिकं तारतम्यमाकाशे यथा कल्पितं तद्वदित्यर्थः ॥ २६ ॥ २७ ॥ नन्वतिवर्णाश्रमस्य तत्त्वज्ञानेन सकार्यस्याज्ञानस्य निवृत्तौ शिष्यमपश्यतः कं प्रति गुरुत्वं शिष्यप्रतिभाने वा तत्कारणमज्ञानमनुभवन्नासौ विद्वानिति चेन्न । विदुषोऽपि बाधितानुवृत्तिसंभवादित्यभिप्रेत्य तत्र निदर्शनमाह—विनष्टेति । तिस्रो ह्यज्ञानस्यावस्थाः । एका तावद्दृश्यं सर्वं सत्यमित्यभिमानहेतुः । सा युक्तिशास्त्रजनिताद्विवेकज्ञानान्निवर्तते । तन्निवृत्तावपि यथापूर्वमभिनिवेशेन व्यवहारहेतुर्द्वितीया सा तत्त्वसाक्षात्कारान्निवर्तते । तन्निवृत्तावपि संस्कारमात्रेण देहाभासजगदवभासहेतुस्तृतीया बाधितानुवृत्तिरित्युच्यते । सा चरमसाक्षात्कारेण निवर्तते । एतदवस्थात्रयं क्रमेणैव श्रूयते—“तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः” इति । तत्र तृतीयकक्षायां स्थितस्यातिवर्णाश्रमस्य विदुषोऽपि शिष्यादिदर्शनादुपदेशसंभवाद्ग्रहनक्षत्रगत्यादिदर्शनान्निवृत्तोऽपि दिङ्मोहः संस्कारमात्राद्यथा भासत एवमिह संस्कारमात्राच्छिष्यादिभानादुपदेशोपपत्तिर्द्वैताभावस्य युक्तिशास्त्रानुभवैरवधृतत्वाद्द्विद्वत्ताऽपीत्यर्थः ॥ २८ ॥ ननु बाधितस्य कथमनुवृत्तिः । अनुवृत्तौ वा कथं बाधः । अभावबोधो हि बाधः । न च भावेन सहाभावो बोधार्ह इत्यत आह—यथा स्वप्नेति । बोधोत्तरकालं बाधितः स्वप्नप्रपञ्चः प्रागप्यसत्त्वेन प्रतीयमानोऽपि प्राक्कालसंबन्धितया स्मृत्या यथाविपर्यीक्रियते । एवं वर्तमानप्रपञ्चोऽसत्त्वे-

इति यो वेद वेदान्तैः सोऽतिवर्णाश्रमी भवेत् ॥३०॥
यस्य वर्णाश्रमाचारो गलितः स्वात्मदर्शनात् ।
स वर्णानाश्रमान्सर्वानतीत्य स्वात्मनि स्थितः॥ ३१ ॥
योऽतीत्य स्वाश्रमान्वर्णानात्मन्येव स्थितः पुमान् ।
सोऽतिवर्णाश्रमी प्रोक्तः सर्ववेदान्तवेदिभिः ॥ ३२ ॥
न देहो नेन्द्रियं प्राणो न मनो बुद्ध्यहंकृती ।
न चित्तं नैव माया च न च व्योमादिकं जगत् ॥
न कर्ता नैव भोक्ता च न च भोजयिता तथा ।
केवलं चित्सदानन्दब्रह्मैवाऽऽत्मा यथार्थतः ॥ ३४ ॥
जलस्य चलनादेव चञ्चलत्वं यथा रवेः ।
तथाऽहङ्कारसंबन्धादेव संसार आत्मनः ॥ ३५ ॥
तस्मादन्यगता वर्णा आश्रमा अपि केशव ।
आत्मन्यारोपिता एव भ्रान्त्या ते नाऽऽत्मवेदिनः॥३६॥
न विधिर्न निषेधश्च न वर्ज्यावर्ज्यकल्पना ।

---

ानुभूयमानोऽपि संस्कारवशात्तत्कालसंबन्धितया किं नभासेतेत्यर्थः ॥२९॥ .० ॥ ननु वर्णाश्रमाचारातिक्रमश्चेदित्थमुत्कर्षकारणं जितं पाषण्डैरित्यत ाह—यस्य वर्णाश्रमेति । तत्त्वसाक्षात्कारेण विगलितदेहाद्यात्मत्वाभिमानो हेन सहैव तद्धर्माणां वर्णाश्रमाणामतिक्रमादतिवर्णाश्रमी । ईदृक्परमकाष्ठाम- ासोऽपि नास्तिकः प्रमादालस्यादिभिस्त्यजन्नकरणनिमित्तप्रत्यवायोपचयादधः तति । अत एव हि प्रागत्रैवोक्तम् —" वर्णाश्रमाचारवता पुरुषेण महेश्वरः। ाराध्यते प्रमादार्थं न दुर्वृत्तैः कदाचन " इति । प्राप्तप्रसादस्त्वतिवर्णाश्र- ानि महत्तरम्यम् ॥ ३१ ॥ ३२ ॥ उक्तस्यातिवर्णाश्रमस्यानुभवं विशद- ति—न देह इत्यादिना ॥ ३३ ॥ ३४ ॥ तत्त्वविषयं तदीयमनुभवप्रकार- कृत्वा दृष्टान्तविषयमिदानीमाह—जलस्येति । आत्मनि कर्तृत्वभोक्तृत्वादिकं